# .. sUryastotram 4 ..

## || સૂર્યસ્તોત્રમ્ ૪ ||

## Sanskrit Document Information

Text title : sUryastotram 4

File name : sUryastotram4.itx

Location : doc_z_misc_navagraha

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : February 20, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

February 21, 2017

*sanskritdocuments.org*

# ॥ સૂર્યસ્તોત્રમ્ ૪ ॥

શ્રીગણેશાય નમઃ ॥

ૐ સપ્તાશ્વં સમારુહ્યારુણસારથિમુત્તમમ્ ।
શ્વેતપદ્મધરં દેવં ત્વાં સૂર્યં પ્રણમામ્યહમ્ ॥ ૧॥

બન્ધૂકપુષ્પસઙ્કાશં હારકુણ્ડલભૂષણમ્ ।
એકચક્રધરં દેવં ત્વાં સૂર્યં પ્રણમામ્યહમ્ ॥ ૨॥

લોહિતસ્વર્ણસઙ્કાશં સર્વલોકપિતામહમ્ ।
સર્વવ્યાધિહરં દેવં ત્વાં સૂર્યં પ્રણમામ્યહમ્ ॥ ૩॥

ત્વં દેવ ઈશ્વરઃ શક્રબ્રહ્મવિષ્ણુમહેશરાટ્ ।
પરં ધર્મં પરં જ્ઞાનં ત્વાં સૂર્યં પ્રણમામ્યહમ્ ॥ ૪॥

ત્વં દેવલોકકર્તા ચ કીર્ત્યાત્મા કરણાંશકમ્ ।
તેજો રુદ્રધરં દૈવં ત્વાં સૂર્યં પ્રણમામ્યહમ્ ॥ ૫॥

પૃથિવ્યપ્તેજો વાયુશ્ચાત્માપ્યાકાશમેવ ચ ।
સર્વજ્ઞં શ્રીજગન્નાથં ત્વાં સૂર્યં પ્રણમામ્યહમ્ ॥ ૬॥

અખણ્ડમણ્ડલાકારં વ્યાપ્તં યેન ચરાચરમ્ ।
ગગનાલિઙ્ગમારાધ્યં ત્વાં સૂર્યં પ્રણમામ્યહમ્ ॥ ૭॥

નિર્મલં નિર્વિકલ્પં ચ નિર્વિકારં નિરામયમ્ ॥

જગત્કર્તા જગદ્ધર્તાસ્ત્વાં સૂર્યં પ્રણમામ્યહમ્ ॥ ૮॥

સૂર્યસ્તોત્રં જપેન્નિત્યં ગ્રહપીડાવિનાશનમ્ ।
ધનં ધાન્યં મનોવાઞ્છા શ્રિયઃ પ્રાપ્નોતિ નિત્યશઃ ॥ ૯॥

શિવરાત્રિસહસ્રેષુ કૃત્વા જાગરણં ભવેત્ ।
યત્ફલં લભતે સર્વં તદ્વૈ સૂર્યસ્ય દર્શનાત્ ॥ ૧૦॥

એકાદશીસહસ્રાણિ સઙ્ક્રાન્ત્યયુતમેવ ચ ।
સપ્તકોડિસુ દર્શેષુ તત્ફલં સૂર્યદર્શનાત્ ॥ ૧૧॥

અશ્વમેધસહસ્રાણિ વાજપેયશતાનિ ચ ।
કોટિકન્યાપ્રદાનાનિ તત્ફલં સૂર્યદર્શનાત્ ॥ ૧૨॥

ગયાપિણ્ડઃ પરં દાને પિતૃણાં ચ સમુદ્ધરમ્ ।
દૃષ્ટ્વા હ્યગ્નેશ્વરં દેવં તત્ફલં સમવાપ્નુયાત્ ॥ ૧૩॥

અગ્નેશ્વરસમોપેતો સોમનાથસ્તથૈવ ચ ।
કેદારમુદકં પીત્વા પુનર્જન્મ ન વિદ્યતે ॥ ૧૪॥

સૂર્યસ્તોત્રં પઠેન્નિત્યમેકચિત્તઃ સમાહિતઃ ।
દુઃખદારિદ્યનિર્મુક્તઃ સૂર્યલોકં સ ગચ્છતિ ॥ ૧૫॥

ઇતિ સૂર્યસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Pallasena Narayanaswami ppnswami at gmail.com

.. sUryastotram 4 ..
was typeset using XƎLaTeX 0.99996
on February 21, 2017

Please send corrections to *sanskrit@cheerful.com*